
# श्रीजगन्नाथतत्त्वम्



डॉ. महेश-कुमार-पाणिग्राही
डॉ. सत्यवान-पण्डा

Scanned with CamScanner

# श्रीजगन्नाथतत्त्वम्

## SHRI JAGANNATHA TATWAM

© Dr. Mahesh Kumar Panigrahi
All rights are reserved

**सम्पादकौ**

डा. महेशकुमारपाणिग्राही

डा. सत्यवानपण्डा

**Editors**

Dr. Mahesh Kumar Panigrahi,

Dr. Satyaban Panda

ISBN-978-93-5361-313-6

प्रकाशनम्- २०१९

मूल्यम्- ८०

**प्रकाशकः-**

डा. महेशकुमारपाणिग्राही

राष्ट्रियसंस्कृतसंस्थानम्,(मा.वि.)

गुरुवायूर् परिसरः, केरलम्

**Publisher**

Dr. Mahesh Kumar Panigrahi

Rashtriya Sanskrit Santhan, (D.U.)

Guruvayur Campus, Kerala

**मुद्रकः-**

सुश्रीप्रकाशनी,

शालिकोठा, जलेश्वरः,

वालेश्वरम्

**Printer**

Sushri prakasani

Salikotha, Jaleswar,

Balasore

Scanned with CamScanner

# विषयविवरणम्


| विषयः | लेखकः | | पृष्ठासंख्या |
|---|---|---|---|
| १) जगन्नाथदर्शने रथयात्रायाः महत्त्वम् | - डॉ.गगनचन्द्रदे | - | ०१ |
| २) श्रीजगन्नाथः- एका तत्त्वनिबन्धनाप्रेक्षा | - डॉ. सुबलचन्द्रसाहुः | - | ०५ |
| ३) सर्वधर्मेषु श्रीजगन्नाथः | - डॉ. जितेन्द्रकुमाररायगुरुः | - | १२ |
| ४) पुराणेषु जगन्नाथतत्त्वम् | - डॉ. सम्बितमहापात्रः | - | १६ |
| ५) सर्वधर्मसमन्वयात्मकः श्रीजगन्नाथः | - डॉ. इतिश्री महापात्र | - | १९ |
| ६) स्कन्दपुराणान्तर्गत-उत्कलखण्डे श्रीजगन्नाथतत्त्वरहस्यम् | - डॉ. सत्यवानपण्डा | - | २३ |
| ७) दारुब्रह्म | - डॉ. महेशकुमारपाणिग्राही | - | २७ |
| ८) मुक्तिः श्रीपुरुषोत्तमे | - डॉ.लक्ष्मीकान्तषडङ्गी | - | ३३ |
| ९) बौद्धसंस्कृतौ श्रीजगन्नाथः | - अध्यापकः चन्दनमण्डलः | - | ३६ |
| १०) जगन्नाथस्वामी नयनपथगामी | - डॉ. अनिलकुमारः | - | ४० |
| ११) श्रीजगन्नाथतत्त्वे परमात्मानुचिन्तनम् | - डॉ. शुभदर्शी दाशः | - | ४४ |
| १२) श्रीपुरुषोत्तमतत्त्वम् | - डॉ. देवाशीष दाशः | - | ४७ |
| १३) श्रीजगन्नाथतत्त्वम् | - सुकान्तबेहेरा | - | ४९ |
| १४) तन्त्रागमीयं जगन्नाथतत्त्वम् | - दुर्गाप्रसादमिश्रः | - | ५२ |
| १५) भारतीयतन्त्रशास्त्रे श्रीजगन्नाथः | - अशोक कुमार शतपथी | - | ५६ |
| १६) विश्वसंस्कृतौ जगन्नाथसंस्कृतेः महत्त्वम् | - डॉ. हेमन्तत्रिपाठी | - | ५९ |
| १७) श्रीजगन्नाथस्य वार्षिकवेशभूषा | - शाश्वती शताब्दिका पात्र | - | ६२ |
| १८) ॐ कार श्रीजगन्नाथः | - श्रीपङ्कज कुमार माहाना | - | ६५ |
| १९) श्रीजगन्नाथचेतना | - प्रियंका महान्त | - | ६८ |
| २०) दारुब्रह्मस्य दिव्यजीवनम् | - ज्योतिलक्ष्मी वारिक् | - | ७३ |


Scanned with CamScanner

# बौद्धसंस्कृतौ श्रीजगन्नाथः

**अध्यापकः चन्दनमण्डलः**
संस्कृतविभागः
गड़वेतामहाविद्यालयः, पश्चिमवङ्गः

श्रीजगन्नाथसंस्कृतेः प्रभावो बौद्धसंस्कृतावपि परिलक्ष्यते। बुद्धदेवस्य जन्मतः ख्रीष्टीयसप्तमशताव्दीं यावत् उत्कलेषु प्रचलितेषु विभिन्नेषु धर्मेषु बौद्धधर्मः स्वप्रभावं विस्तारितवान्। तत्र विशेषतः उत्कलीयवैष्णव-नाथ-शैव-शाक्तधर्मेषु बौद्धधर्मस्य प्रत्यन्तं प्रभावः परिलक्ष्यते। अतः श्रीजगन्नाथचेतनायाः विकाशे बौद्धधर्मस्य भुमिका गुरुत्वपूर्णा।

ख्रीष्टपूर्वचतुर्थशताब्दीतः उत्कलेषु बौद्धधर्मस्य प्रसिद्धिर्जाता। ख्रीष्टपूर्व २६१ वर्षे अशोकमहाराजस्य कलिङ्गविजयानन्तरं उत्कलेषु बौद्धधर्मस्य बहुप्रचारऽभवत्। यद्यपि ख्रीष्टपूर्वप्रथमशताब्द्यां खारवेलः कलिङ्गेषु जैनधर्मस्य बहुलप्रचारं कृतवान् तथापि तदानीं तस्य बौद्धधर्मं प्रति विशेषसम्मानम् आसीत्। फलतः परवर्त्तिनि काले बौद्धजैनधर्मयोः सत्ता श्रीजगन्नाथधर्मे अनुभूता आसीदिति सम्बलपुरस्थराज्ञः इन्द्रभूतेः [१]'ज्ञानसिद्धि' ग्रन्थस्य मङ्गलाचरणात् प्रतीयते। परवर्त्तिनि काले प्रख्यातबौद्धदार्शनिकः नागार्ज्जुनः पश्चिमोत्कलेषु परिमलगिरिप्रभृतिस्थाने विहारादिकं प्रतिष्ठाप्य बौद्धधर्मप्रचारे प्रसिद्धिमलभत इति हुएन्सामहोदयैः प्रतिपादितम्। न केवलमेतत् अपि च पुरीमण्डलान्तर्गत डेलाङ्गस्थाननिकटस्थ [२]भोरशैलोपरि बौद्धविहारं निर्मीय चतुर्थशतकै आचार्यदिङ्नागः योगाचारसिद्धविज्ञानवादस्य प्रचारं कृतवान् । डॉ. काह्नुचरणमिश्रमहोदयैः[३] प्रतिपादितं यत् पञ्चमषष्ठशतकयोः उत्कलेषु बालेश्वर केन्दुझर-पुरीमण्डलप्रभृतिषु महायानबौद्धाः अनेकान् बौद्धविहारान् निर्मीय तत्र शवरवत् देवदेवीपूजामकुर्वन् । तच्छलेन पुरीमण्डलान्तर्गतवाणपुरे स्थापिता भगवतीमूर्तिः बौद्धतान्त्रिकमूर्त्तिरीति [४]हुएन्सांमहोदयानामभिमतम्। सम्प्रति उपलब्धात् एक [५]ताम्रफलकात् ज्ञायते यत् वालेश्वरमण्डलस्य राजा गोपचन्द्रः बौद्धविहारप्रतिष्ठातुं तत्र अवलोकितेश्वरस्य उपासनार्थं च किञ्चित् भुमिदानम् आर्यभिक्षुसंघाय कृतवान् इति। अष्टमनवमशतकद्वये उत्कलेषु बौद्धधर्मस्य पतनं जातम्। एतस्मिन् समये बौद्धपण्डिताः बौद्धधर्मं ब्राह्मण्यधर्मेण सह संयुज्य बौद्धधर्मस्य रूपान्तरं कृतवन्तः। फलतः साम्प्रतमुत्कलेषु प्रचलितवैष्णवधर्मे बौद्धधर्मस्य प्रवेशोऽस्ति इति [६]विद्वांसः आमनन्ति। तदुद्देश्येन [७]ऐतिहासिकैः उत्कलानां पञ्चसखायः प्रच्छन्नबौद्धत्वेन कल्पिताः इत्येतेभ्य निदर्शनिभ्योऽपि श्रीजगन्नाथसंस्कृतिः सूच्यते।

श्रीजगन्नाथदेवे बुद्धत्वारोपयितुमपि प्रकृष्टमुदाहरणं प्राप्यते गोस्वामिश्रीजयदेवस्य [८]कृतिभ्यः। तच्छलेन श्रीजगन्नाथसंस्कृतौ नवकलेवरसमये दारुमुर्त्तिभ्यः स्थानान्तरितं ब्रह्म एव 'बुद्धदेवस्य दन्तः इति [९]केचन स्वीकुर्वन्ति। तदाधाररूपेण या किम्बदन्ती श्रूयते तस्याः अपि उद्धरणं [१०]स्थलविशेषे परिलक्ष्यते। किन्तु श्रीजगन्नाथदेवस्य नाभिब्रह्म श्रीकृष्णस्य शरीरावशेषः बुद्धदेवस्य दन्तो वेत्यस्मिन् विषये असम्मतानां [११]विदुषां मतं कथं वा नानुसरणीयम्? अतः श्रीजगन्नाथदेवस्य प्रतिष्ठापको राजा इन्द्रद्युम्नः बौद्धधर्मावलम्बी आसीत् इति विहारप्रदेशस्य मुङ्गेरमण्डले आविष्कृतबौद्धध्वंसावशेषादुपलब्धात् 'इन्द्रद्युम्नगड' इत्यभिधानात् ज्ञायते इति प्रतिपादकानां[१२] मतं न तावत् साधु भवेत्। किन्तु जगन्नाथादित्रिमुर्त्तेः बौद्धधर्मत्रिरत्नसाधने डॉ. महतावमहोदयानामभिमतं[१३] समीचीनं भवति। श्रीजगन्नाथसंस्कृतौ स्नानयात्रारथयात्रादिकं यथा सम्पद्यते

Scanned with CamScanner